दिनाङ्क :- 24.01.2026

प्रात: - 06:55

<u>अथ वार्ता:</u>

**<u>प्रधानमन्त्री/तमिलनाडु-केरले</u>**

प्रधानमन्त्री अवदत् यत् तमिलनाडु-सर्वकारः परिवर्तनाय सज्जः अस्ति। सः अवदत् यत् डी.एम्.के.-सन्नीतः सर्वकारः विकासं कर्तुं विफलः अभवत्। अपि च एषः भ्रष्टाचारापराध-वंशीय-राजनीतिभिः ग्रस्तः अवर्तत।

भारतीय-जनता-पार्टीति-दलस्य वरिष्ठः नेता प्रधानमन्त्री च नरेन्द्र-मोदी उक्तवान् यत् एनडीए-इति राष्ट्रिय-लोकतान्त्रिक-संयुत्याः सर्वकारेण विगतेषु एकादशसु वर्षेषु तमिलनाडु-राज्यस्य विकासाय एकादश-लक्ष-कोटि-रूप्यकाणि आवण्टितानि। तमिलनाडु-राज्यस्य मदुरान्तकम्-नगरे एकां जनसभां सम्बोधयन् श्री-मोदी अवदत् यत् केन्द्रराज्य-समन्वयः कल्याणकारि-योजनानां प्रभावि-कार्यान्वयनं सुनिश्चितं करोति।

ततः प्राक्, प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः केरल-राज्यस्य तिरुअनन्तपुरम्-नगरे विविध-विकास-परियोजनाः उद्घाटिताः, नूतनानां रेलयान-सेवानाञ्च ध्वजप्रदर्शन-पूर्वकं शुभारम्भो विहितः। श्रीमोदी पी.एम्.स्वनिधि-क्रेडिट्-कार्ड्-इत्येतदपि उद्घाटितवान्, एक-लक्षाधिकेभ्यश्च लाभार्थिभ्यः पी.एम्. स्वनिधि-

ऋणस्य वितरणं च अकरोत्। प्रधानमन्त्री त्रीणि अमृत-भारत-एक्स्प्रेस्-रेलयानानि, एकं यात्रि-रेलयानम् आहत्य चतस्रः नूतनाः रेलयानसेवाः च उद्घाटितवान्। एतदतिरिच्य, सः **<u>सी.एस्.आई.आर्.-एन्.आई.आई.एस्.टी.</u>** इति नवान्वेषणस्य, तन्त्रज्ञानस्य उद्यमशीलतायाः च केन्द्रस्य शिलान्यासं कृतवान्। सः नगरस्य श्रीचित्र-तिरुनाळ्-आयुर्विज्ञान-प्रौद्योगिकी-संस्थाने अत्याधुनिकस्य रेडियोसर्जरी-केन्द्रस्य शिलान्यासमपि कृतवान्, नूतनस्य पूजप्पुर-मुख्य-पत्रकार्यालयस्य च उद्घाटनम् अकरोत्। तिरुवनन्तपुरे जनसमूहं सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत् एन्.डी.ए.-सर्वकारः सम्पर्क-विज्ञान-नवान्वेषण-स्वास्थ्यसेवासु महद्निवेशं कुर्वन् अस्ति। प्रधानमन्त्री मोदी अवदत् यत्, सम्पूर्णः देशः "विकसितभारतम्" इत्येतत् लक्ष्यं प्रति संयुक्तरूपेण कार्यं कुर्वन् अस्ति।

==============================

**<u>प्रधानमन्त्री/'रोजगारमेला'</u>**

प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्यश्रव्य-संवादतन्त्रेण अष्टादशे रोजगार-मेला इति वृत्तिमेलके विभिन्नेषु शासकीय-विभागेषु संस्थासु च नवनियुक्तेभ्यः युवभ्यः एकषष्टि-सहस्राधिकानि नियुक्तिपत्राणि वितरिष्यन्ति। अस्मिन् अवसरे सः एकां सभाम् अपि सम्बोधयिष्यति। एतत् मेलकं देशे पञ्चचत्वारिंशत्-स्थानेषु आयोजतिष्यन्ते। नवनियुक्ताः अभ्यर्थिनः गृहमन्त्रालये, स्वास्थ्यपरिवारकल्याणमन्त्रालये, वित्तीयसेवाविभागे, उच्चशिक्षाविभागे त्यादि-संस्थासु अनेकमन्त्रालयेषु विभागेषु च वृत्तिं लप्स्यन्ते।

================================

**सर्वकारः/वेतनसंशोधनम्**

केन्द्रसर्वकारेण सार्वजनिकक्षेत्रस्य जनरल्-इंश्योरेंस् इति संस्थानेभ्यः नेशनल्-बैंक-फॉर्-एग्रीकल्चर्-एंड-रूरल्-डेवलपमेंट् (NABARD) इत्यस्मै च वेतनसंशोधनस्य कृते स्वीकृतिः प्रदत्ता। अपि च, भारतीय-रिजर्व-बैंकस्य NABARD इत्यस्य च सेवानिवृत्त-कर्मचारिभ्यः निवृत्तिवेतन-संशोधनस्य कृते अपि स्वीकृतिः विहितास्ति।

================================

**ऋतुविज्ञानविभागः**

भारतीयर्तुविज्ञानविभागेन पञ्जाब-हरियाणा-चण्डीगढ-दिल्लीभ्यः आगामि-दिवसत्रयाय नारङ्गवार्णिकी संचेतना प्रसारिता अस्ति।

==========================

**क्रिकेट्**

क्रिकेट्-क्रीडायाःटी-20-संस्करणे ह्यः रायपुर-नगरस्य शहीद-वीर-नारायण-सिंह-अन्ताराष्ट्रिय-क्रीडाङ्गणे द्वितीयायां स्पर्धायां भारतेन न्यूज़ीलैण्ड-दलं सप्तभिः क्रीडकैः पराजितम्।

॥ इति वार्ता:॥